યા સુગંધસ્યનાસાદિ-નવદ્વારાઽખિલેન યા |
દુરાધર્ષા સર્વસસ્યોદયાર્થં યા કરીષિણી ||૧ ||
યા નિત્યપુષ્ટા સર્વાંગૈઃ સૌંદર્યાદિગુણૈરપિ |
ઈશ્વરીં સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ્ ||૨ ||
માતર્લક્ષ્મિ નમસ્તુભ્યં માધવપ્રિયમાનિનિ |
યુવાં વિશ્વસ્ય પિતરાવિતરેતરયોગિનૌ ||૩ ||
સમના કિલ માતસ્ત્વમમુના તતયોગિની |
મમ નાથેન દેવશ્ચ વિમનાશ્ચ ન સ ત્વયિ ||૪ ||
ત્વં વેદમાનિની વેદવેદ્યઃ કિલ સ તે પ્રિયઃ |
ત્વં મૂલપ્રકૃતિર્દેવી સ ચાદિપુરુષઃ કિલ ||૫ ||
યસ્ત્વામુરસિ ધત્તેઽંબ કૌસ્તુભદ્યુતિભાસિતે |
સત્વાં નૈવાચ્યુતઃ સર્વસ્યાત્યયે સત્યપિ ત્યજેત્ ||૬ ||
દેવિ ત્વં લલનારત્નં દેવોઽસૌ પુરુષોત્તમઃ |
યુવાં યુવાનૌ સતતં યુવયોર્ન વયોઽધિકઃ ||૭ ||
ત્વં પદ્મિનીપદ્મવક્ત્રા પદ્માક્ષી પદ્મવિષ્ટરા |
પદ્મદ્વયધરા પદ્મ કોશોદ્યત્સ્તનશોભના ||૮ ||
પદ્મહસ્તા પદ્મપાદા પદ્મનાભમનઃપ્રિયા |
પદ્મોદ્ભવસ્ય જનની પદ્મા ચ વરવર્ણિની ||૯ ||
અંબાં પીતાંબરશ્રોણીં લંબાલકલસન્મુખીં |
બિંબાધરોષ્ઠીં કસ્તૂરિ-જંબાલતિલકાં ભજે ||૧૦ ||
રત્નોદ્દીપ્તસુમાંગલ્ય-સૂત્રાવૃતશિરોધરામ્ |
કુંડલપ્રભયોદ્દંડ-ગંડમંડલમંડિતામ્ ||૧૧ ||
કુચકંચુક સંચારિ-હારનિષ્કમનોહરામ્ |
કાંચી-કિંકિણિ-મંજીર-કંકણાદ્યૈરલંકૃતામ્ ||૧૨ ||
સુવર્ણમંટપે રત્નચિત્રસિંહાસનોત્તમે |
નમામિ હરિણા સાકમિંદિરાં કૃતમંદિરામ્ ||૧૩ ||
બ્રહ્માદ્યા વિબુધશ્રેષ્ઠાઃ બ્રહ્માણ્યાદ્યાઃ સુરાંગનાઃ |
યાં પૂજયંતે સેવંતે સા માં પાતુ રમા સદા ||૧૪ ||
સર્વાલંકાર ભરિતૌ સર્વજ્ઞૌ સર્વસદ્ગુણૌ |
શર્વાદિસર્વભક્તૌઘ સર્વસર્વસ્વદાયકૌ ||૧૫ ||
સુમુખૌ સુંદરતનૌ સુનાસૌ સુખચિત્તનૂ |
સુરારાધિતપાદાબ્જૌ રમાનારાયણૌ સ્તુમઃ ||૧૬ ||
ચતુષ્કપર્દા યા દેવી ચતુરાસ્યાદિભિઃ સ્તુતા |
ચતુર્વેદોદિતગુણા ચતુર્મૂર્તેર્હરેઃ પ્રિયા ||૧૭ ||
ઘૃતપ્રતીકાં તાં નિત્યં ઘૃતપૂર્ણાન્નદાયિનીમ્ |
યથેષ્ટવિત્તદાત્રીં ચ નતોઽસ્મ્યભયદાં શ્રિયમ્ ||૧૮ ||
વાદિરાજેન રચિતં શ્રીશ્રીશગુણદર્પણમ્ |
ઇમં સ્તવં પઠન્ મર્ત્યઃ શ્રીમાન્ સ્યાન્નાત્ર સંશયઃ ||૧૯ ||

||ઇતિ શ્રીવાદિરાયયતિકૃતં શ્રીશ્રીશગુણદર્પણ સ્તોત્રં સંપૂર્ણમ્ ||